K20U 0431

Reg. No. : ..............................

Name : ..................................

GOVT. BRENNEN COLLEGE CENTRAL LIBRARY THALASSERY

## II Semester B.A. Degree CBCSS (OBE) (Regular) Examination, April 2020
## (2019 Admission)
## CORE COURSE IN SANSKRIT
## 2B 02 SKT : Mahakavya

Time : 3 Hours Max. Marks : 40

*सूचना : सर्वे प्रश्नाः संस्कृतभाषयैव समाधेयाः । देवनागरीलिपिरूपयोक्तव्या ।*

I. **वाक्येन वाक्याभ्यां** वा उत्तरं लिखत । **(6×1=6)**

1) हरिः कीदृशं मुनिं ददर्श ?

2) नारदस्य यज्ञोपवीतं कीदृशमासीत् ?

3) सपुण्डरीकाक्ष इति स्फुटोऽभवत्–कः ? कथम् ?

4) पञ्च महाकाव्यानि कानि ?

5) शुचिस्मितां वाचमवोचदच्युतः–कथम् ?

6) कः हेमाद्रिगुहान्तरं प्रविश्य बिभ्यद्दिवसानि निनाय ? कुतः ?

II. क) **द्वयोः** लघूपन्यासं लिखत । **(2×2=4)**

7) नारदस्वरूपम् ।

8) कृष्णेन कृता नारदस्तुतिः ।

9) हिरण्यकशिपुरावणयोः बलवत्तरः शिशुपालः ।

ख) **चत्वारि** व्याख्यात । **(4×2=8)**

10) गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः ।
पतत्यधो धाम विसारिसर्वतः किमेतदित्याकुलमीक्षितं जनैः ।।

11) महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे ।
श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम् ।।

12) हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ।।

13) अभूदभूमिः प्रतिपक्षजन्मनां भियां तनूजस्तपनद्युतिर्दितेः ।
यमिन्द्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते ।।

14) रणेषु तस्य प्रहिताः प्रचेतसा सरोषहुङ्कारपराङ्मुखीकृताः।
प्रहर्तुरेवोरगराजरज्जवो जवेन कण्ठं सभयाः प्रपेदिरे ।।

P.T.O.

III. चतुर्णां ससन्दर्भं आशयं लिखत । (4×3=12)

15) भवन्ति नापुण्यकृतां मनीषिणः ।

16) निपातनीया हि सतामसाधवः ।

17) ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः ।

18) पुमांसमभ्येति भवान्तरेष्वपि ।

19) विषाणमद्यापि पुनः प्ररोहति ।

20) प्रकम्पयामास न मानसं न सः ।

IV. द्वे उपन्यस्यत। (2×5=10)

21) पञ्चमहाकाव्यान्यधिकृत्य निबन्धमेकं लिखत ।

अथवा

नारदश्रीकृष्णसंवादं विशदयत ।

22) नारदेन कृतं रावणपराक्रमवर्णनम् ।

अथवा

माघे सन्ति त्रयो गुणाः–समर्थयत ।